# एपीजे स्कूल, शेख सराय

## प्रथम सत्रीय परीक्षा, 2019-20 SS-3

## विषय-संस्कृतम्

## कक्षा-अष्टमी

*समय : होरात्रयम्* *पूर्णांक : 80*

---

निर्देशा-(*i*) *प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*खण्डः (क) अपठित-अवबोधनम् - 10 अंङ्काः*

*खण्डः (ख) रचनात्मक-कार्यम् - 10 अंङ्काः*

*खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अंङ्काः*

*खण्डः (घ) पठित-अपवबोधनम् - 30 अंङ्काः*

(*ii*) *सर्वे प्रश्नाः आनिवार्याः।*

(*iii*) *प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।*

(*iv*) *प्रश्नसंख्या अवश्यमेव लेखनीया।*

(*v*) *उत्तराणि संस्वतैव लेखनीयानि।*

---

## (खण्ड-क)

## अपठितांशं-अवबोधनम् (10 अंङ्काः)

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत—

पेंग्विनपक्षिराजस्य कुलायव्यवहारः अद्‌भुतः वर्तते। तस्य स्त्री हिमस्य उपरि केवलम् एकमेव अण्डं सूते सपदि च समुद्रं प्रति निवर्तते। पुमान् पेंग्विनपक्षी स्वशावकस्य उद्भवपर्यन्तम् अण्डं सेवते। स तदण्डं स्वपादयोः समीपे कृत्वा स्वशरीरस्य अधोभागेन आवृत्य तिष्ठति। तदा सः अन्यैः अनेकैः पुंभिः पेंग्विनपक्षिभिः साकं मासद्वयपर्यन्तम् अण्डं सेवमानः तिष्ठति। एतस्मिन् अन्तराले स किञ्चिदपि न खादति। अहो पितृवात्सल्यम्।

I. एकपदेन उत्तरत— (4)

(क) पुमान् पेंग्विनपक्षी कस्य उद्भवपर्यन्तम् अण्डं सेवते?

(ख) एतस्मिन् अंतराले सः किम् खादति?

(ग) पेंग्विनपक्षिराजस्य कः अद्‌भुतः वर्तते?

(घ) तस्य पत्नी हिमस्य उपरि कति अण्डं सूते?

II. पूर्णवाक्येन उत्तरत— (2)

(क) पेंग्विनपक्षी तदण्डं कथम् आवृत्य तिष्ठति?

III. निर्देशानुसारम् उत्तरत— (4)

(क) 'तत्क्षणम्' अस्य पर्यायवाचिपदं गद्यांशात् चित्वा लिखत।

(ख) 'कृत्वा' इति पदे कः प्रत्ययः प्रयुक्तः?

(ग) 'तस्य स्त्री' अत्र 'तस्य' सर्वनामपदं कस्मै प्रयुक्तम्?

(घ) 'वर्तते' अस्मिन् क्रियापदे धातुः अस्ति।

## (खण्ड-ख)

## (रचनात्मककार्यम्) (10 अङ्काः)

2. उचित-पदैः रिक्त-स्थानानि पूरयित्वा स्वपितरं प्रति लिखितं पत्रं पूर्णं कुरुत। पदानि मञ्जूषायां सन्ति- (5)

छात्रावासतः

०५/०३/२०१९

परमपूज्य (i) .................

सादरं चरणवन्दना।

अत्रकुशलं (ii) .................।

ह्यः मम परीक्षाः समाप्ताः। भवान् एतत् (iii) ............ प्रसन्नः भविष्यति यत् मम सर्वे प्रश्नपत्रा (iv) ............ अभवन्। विद्यालये (v) ............ संस्कृत-कार्यशाला अस्ति। अहं एतस्यां (vi) ............ भागं ग्रहीतुं वाञ्छामि। कार्यशालायाः (vii) ............ गृहम् आगमिष्यामि। मात्रे मम (viii) .......... अनुजायै च (ix) .............। भवतां प्रियः पुत्रः

(x) .............

**मञ्जूषा**—दिनद्वयस्य, पितः, तत्रास्तु, ज्ञात्वा, कार्यशालायाम्, उत्तमाः, अनन्तरम्, अर्णवः, प्रणामाः, स्नेहः

3. अधः प्रदत्तम् चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि लिखत— (5)



**पदानि**—पालितः, कुक्कुरः, शेरुः, तस्मिन्, स्नेहं, कुर्वन्ति, निशायाम्, सावधानः, रक्षति, भषति, दृष्ट्वा, अपरिचितान्, सर्वेषाम् प्रियः।

## ( खण्ड-ग )

## ( अनुप्रयुक्त व्याकरणम् ) ( 30 अङ्काः )

4. शब्दरूपाणि पूरयत— (5)

| | शब्दः | विभक्तः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| (क) | विद्यार्थिन् | प्रथमा | | | |
| (ख) | सुखार्खिन् | द्वितीया | | | |
| (ग) | भवत् | तृतीया | | | |
| (घ) | मकरी | चतुर्थी | | | |
| (ङ) | भ्रातृ | पञ्चमी | | | |

5. धातु-रूपाणि पूरयत— (5)

| | धातुः | लकारः | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| (क) | पठ् | विधिलिंग | प्रथमः | | | |
| (ख) | गम् | लङ् | मध्यमः | | | |
| (ग) | भू | लृट् | उत्तमः | | | |
| (घ) | सृ | लोट् | प्रथमः | | | |
| (ङ) | अस् | लङ् | मध्यमः | | | |

6. पदानां धातुं लकारं पुरुषं वचनं च लिखत। (5)

| | पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | बोधयन्तु | | | | |
| (ख) | जानन्ति | | | | |
| (ग) | आज्ञापयति | | | | |
| (घ) | अपातयन् | | | | |
| (ङ) | ईक्षे | | | | |

7. सन्धिं संधिविच्छेदं वा कुरुत— (5)

(क) नादन्ति ..............।

(ख) वर्धते + एव ..............।

(ग) प्रत्यगच्छत् ..............।

(घ) यदि + अपि ..............।

(ङ) विद्यार्थी ..............।

8. वाक्येषु क्रियापदानां लकार-परिवर्तनं कुरुत— (5)

(क) उभयोः परस्परं मैत्री **आसीत्**। (लृट् लकारे)

(ख) चटका मित्रस्य कर्तव्यं **पालयति**। (लङ् लकारे)

(ग) कस्यापि वस्तोः अभावः न **अस्ति**। (विधिलिङ्)

(घ) विद्यार्थी सुखं **त्यजेत्**। (लट् लकारे)

(ङ) प्रत्येकं जनः कूपे जलम् **अक्षिपत**। (लट् लकारे)

9. उचित-विभक्ति-पदैः रिक्त-स्थानानि पूरयत— (5)

(क) ............ परितः वाहनानि अचलन्। (वृक्ष)

(ख) छात्राः ............ पृच्छन्तु। (शिक्षक)

(ग) धिक् ............ (असत्यवादिन्)

(घ) ............ पुरतः उद्यानम् अस्ति। (गृह)

(ङ) मल्लः ............ अलम् अस्ति। (मल्ल)

## (खण्ड-घ)

## (पठित-अवबोधनम्) (30 अंङ्काः)

10. अधोलिखितं गद्यांशं, पद्यांशं च पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत—

(अ) गद्यांशः (5)

एकस्याः नद्याः तटे विशालः जम्बु-वृक्षः आसीत्। वर्षर्तौ आगते जम्बुवृक्षः पक्वैः जम्बुफलैः परिपूर्णः जातः। वानरः मकरः च तानि स्वादूनि जम्बुफलानि मिलित्वा आखदताम्। एकदा मकरः कानिचित् फलानि स्वभार्यायै मकर्यै अपि अनयत्। मधुराणि फलानि खादित्वा मकरी अचिन्तयत्, "यः वानरः प्रतिदिनम् एतादृशानि फलानि खादति तस्य हृदयं तु अतिमधुरं भवेत्।" सा मकरम् अवदत्" मम कृते तस्य वानरस्य हृदयम् आनय।

I. पूर्णवाक्येन उत्तरत—

(क) मकरः कुत्र अवसत?

(ख) मकरी कस्य हृदयं खादितु वाञ्छति स्म?

II. पूर्णवाक्येन उत्तरत—

(क) मकरी मकरं किम् अवदत्?

III. भाषिककार्यम्—

(क) 'अखादताम्' पदस्य पद परिचयः दीयताम्?

(ख) 'आनय' इति पदे कः लकारः?

(ग) 'कृते' योगे का विभक्ति?

(घ) 'वर्षर्तौ' पदस्य संधि विच्छेदं कुरुत।

(आ) पद्यांश: (5)

पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः।।
नादन्ति शस्यं खलु वारिवाहाः।
परोपकाराय सतां विभूतयः।।

I. एकपदेन उत्तरत—

(क) नद्यः स्वयमेव किं न पिबन्ति?

(ख) सतां विभूतयः किमर्थं भवन्ति?

II. पूर्णवाक्येन उत्तरत—

(क) शस्यं के न खादन्ति?

(ख) वृक्षाः स्वयं किम् न खादन्ति?

III. भाषिककार्यम्—

(क) श्लोकात् पर्यायवाचि-पदे चित्वा लिखत—

................ मेघाः, ............. जलम्।

(ख) श्लोकात् अव्यय-पदे चित्वा लिखत।

(i) सत्यम् ........... जयते।

(ii) समयः ........... अमूल्यः अस्ति।

11. रेखांकित-पदानि आधृत्य प्रश्न-निर्माणं कुरुत— (5)

(क) **फलानि** खादित्वा मकरः प्रसन्नः अभवत्।

(ख) विद्याधनं **सर्वधनेषु** प्रधानम् अस्ति।

(ग) तौ **सप्तम्यां** कक्षायां पठतः।

(घ) यूयं **भ्रमणाय** अगच्छत।

(ङ) **ते** घोषणां कुर्वन्ति।

12. उचित-अव्यय-पदैः रिक्त-स्थानानि पूरयत— (5)

**पदानि**—सर्वतः, पर्यन्तम्, यथा-तथा, पुरा, ह्यः।

(क) अहम् अष्टवादन ........... अध्ययनं करोमि।

(ख) ............... राजा ........... प्रजा।

(ग) ............. मम परीक्षा आसीत्।

(घ) तस्य कीर्तिः ............. प्रसरति।

(ङ) ............. दशरथः नाम नृपः आसीत्।

13. पर्यायवाचि-पदानि लिखत— (5)

| पदानि | पर्यायवाचि |
|---|---|
| (क) कुशाग्रबुद्धिः | महिला |
| (ख) उन्नति | पक्षिणः |
| (ग) नारी | तीव्रबुद्धिः |
| (घ) रोदनम् | प्रगतिः |
| (ङ) वनचराः | क्रन्दनम् |

14. संस्कृतेन अनुवादं कुरुत— (5)

(क) क्या तुम संस्कृत जानते हो?

(ख) मैं भारत के विषय में जानना चाहता हूँ।

(ग) आकाश में सूर्य चमक रहा है।

(घ) माता पुत्र को पढ़ाती है।

(ङ) आप हमारे राजा हैं।

**एपीजे स्कूल (पंचशील पार्क)**

**वार्षिक परीक्षा (2019-20)**

**परीक्षा विषयः-संस्कृतम्**

**कक्षा- अष्टमी**

**समय-होरात्रयम्** **पूर्णांक-80**

**1. निर्देशानुसारम् केषाञ्चित् षण्णाम् शब्द रुपाणि लिखत- (1/2×18= 9)**

i). नेतृ,,"शब्द सप्तमी विभक्ति तीनों वचनों में।
ii). पितृ" शब्द षष्ठी विभक्ति तीनों वचनों में ।
iii). शशिन्" शब्द द्वितीया विभक्ति तीनों वचनों में।
iv). राजन् ,शब्द पञ्चमी विभक्ति वचनों में ।
v). "महत्" शब्द तृतीया विभक्ति तीनों वचनों में ।
vi) विद्वस् शब्द चतुर्थी विभक्तिः तीनों वचनों में ।
vii). पयस् ," शब्द द्वितीया विभक्ति तीनों वचनों में।
viii). मातृ" शब्द प्रथमा विभक्ति तीनों वचनों में ।
ix) इदम् ( पुल्लिंग )शब्द षष्ठी विभक्ति तीनों वचनों में
x) इदम् ( स्त्रीलिंग) शब्द चतुर्थी तीनों वचनों में।

**2. निर्देशानुसारेण केषाञ्चित् षण्णाम् धातुः रुपाणि लिखत- (1/2×18=9)**

i). "सेव् ," धातु लङ् लकार प्रथम पुरुष तीनों वचनों में।
ii). "लभ्" धातु विधिलिङ् लकार मध्यम पुरुषः तीनों वचनों में।
iii). "पा" धातु लोट् लकार उत्तमपुरुषः तीनों वचनों में।
iv). "गम्" धातु लृट् लकार मध्यम पुरुषः तीनों वचनों में।
v). "पठ्" धातु लृट् लकार मध्यम पुरुषः तीनों वचनों में।
vi). "अस्" धातु लङ् लकार उत्तमपुरुषः तीनों वचनों में।
vii). "गम्" धातु लृट् लकार उत्तमपुरुषः तीनों वचनों में।
viii). "पा" धातु लङ् लकार उत्तम पुरुषः तीनों वचनों।
ix). "सेव्" विधिलिङ् लकार प्रथम पुरुष तीनों वचनों में
x). "सेव्" लट् लकारः मध्यम पुरुषः तीनों वचनों में

**3. निम्नलिखित अंकेभ्यः संस्कृतस्य संख्यावाची शब्दान् लिखत- 2**

58, 83, 99, 79,

**4.उचित - विभक्ति- पदैः रिक्त- स्थानानि पूरयत-5**

i) ________ किमर्थं क्रुध्यसि? ( मित्र)

ii)किम् त्वम् __________ ( अयम् / इदम् / इयम्)

iii) __________ कथायाः शीर्षकं लिखत।( अस्याम् / अस्याः)

iv) बालिकाः _______वंचिताः न भवन्तु। ( शिक्षा)

v) एषः अश्वः तस्मात् _______ तीव्रतरं धावति। ( अश्वः)

**5.संस्कृतेन अनुवादं कुरुत-5**

i) अच्छे कार्यों से धन प्राप्त करो।

ii) भारत में अनेक महान् विद्वान् हुए।

iii) वे किसी नगर में रहते हैं।

iv) विनम्रता सबसे बड़ा आभूषण है।

v) आप शान्त हो जाएँ।

**6.एकपदेन उत्तरत-5**

क) जननी जन्मभूमिः च कस्मात् गरीयसी।

ख) काष्ठिकः कः आसीत्?

ग) सः कां सेवितुं वाञ्छति?

घ) न्यायात् पथः के न प्रविचलन्ति?

ङ•) पक्षिणः आखेटाय कुत्र अभ्रमन्?

**7.पूर्णवाक्येन उत्तरत-5**

क) इदानीं वृक्षं परितः किं वर्तते?

ख) यत्र नार्यः पूज्यन्ते तत्र काः रमन्ते?

ग) कस्य कथनं सत्यं प्रमाणितम्?

घ) संस्कृतं कासां जननी अस्ति?

ङ•) कार्यं प्रारभ्य के न परित्यजन्ति?

**8 .विकल्पेभ्यः उचितम् उत्तरं रिक्तस्थानानि पूरयत- 5**

i) **'स्वराः '** _________'सन्ति।

क) ३ ख) १३ ग) ३३

ii) **' इ'** _________ अस्ति।

क ) व्यञ्जनम् ख) स्वरः ग) अयोगवाहः।

iii) **' द् '** ________ अस्ति।

क) व्यञ्जनम् ख) स्वरः ग) संयुक्त – अक्षरम्

iv) **'श'** _________ अस्ति।

क) स्पर्श ख) अन्तस्थः ग) उष्माण

v) 'ध' ________ अस्ति।
क) तवर्गः ख) चवर्ग ग) कवर्गः

**9. रेखांकितपदानि आधृत्य प्रश्न- निर्माणं कुरुत-5**

i) सः खेलनाय मित्रम् उपगच्छति।
ii) शुभ - कर्मैः वयं सुखं किन्दामः।
iii) विद्यया विहीनाः पशुभिः समानाः।
iv) ते श्वः आगमिष्यन्ति।
v) सः स्वकार्यं सम्यक् करोति।

**10. सूक्तीनाम् अंशान् मेलयत-5**

| | |
|---|---|
| i) यो वनस्पतिषु | i) वाचा नैव प्रकाशयेत् |
| ii) उदारचरितानाम् तु | ii) विमुक्तये |
| iii)सा विद्या या | iii) वसुधैव कुटुम्बकम् |
| iv) तेजसां हि न | iv) तस्मै देवाय नमः |
| v) मनसा चिन्तितं कार्यम् | v) वयः समीक्ष्यते |

**11. संधिं कुरुत- 5**

i) कस्मात् + अपि =
ii) परः + उपकारः =
iii) परि + ईक्षा=
iv) इति + आदि=
v)अद्य + एव

**12.उपसर्गं धातुं प्रत्ययं च पृथक् कुरुत- 5**

| पदानि | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|
| i) आकर्ण्य | | | |
| ii) परीक्षितुम् | | | |
| iii) परिवृत्य | | | |
| iv) आलिंग्य | | | |
| v) वीक्ष्य | | | |

**13.श्लोकांशानां श्लोकांशैः सह मेलनं कुरुत- 5**

| | |
|---|---|
| i) ते मर्त्यलोके भुविभारभूताः | i) प्राणिनामार्तिनाशनम् |
| ii) अद्यैव मरणं भवतु युगान्तरे वा | ii)सतां विभूतयः |
| iii) सन्तोष एव पुरुषस्य | iii) मनुष्यरूपेण मृगाश्चरन्ति |
| iv) परोपकाराय | iv) परं निधानाम् |
| v) कामये दुःखतप्तानाम् | v) न्याय्यात् पथः प्रविचलन्ति पदं न धीराः। |

**14.उचित - क्रिया- पदैः रिक्त- स्थानानि पूरयत-5**
**क्रिया- पदानि** - अहसन्त , भाषन्ते , लभसे , वन्दे , ईक्षते।
i) मित्राणि परस्परं ____________ ।
ii) देशस्य वीराः कष्टानि ____________।
iii) ____________ मातरम्।
iv) त्वं सफलतां ____________।
v) सः चित्राणि ____________।

**15. गद्यांशं पठित्वा प्रश्नान् उत्तरत- 5**
एकदा शीतस्य भीषणः प्रकोपः अभवत्। सम्राट् चन्द्रगुप्तः निश्चितवान् यत् निर्धनेभ्यः कम्बलानां वितरणं भवेत्। प्रधानमंत्री चाणक्यः तत्कार्यं स्वीकृतवान्। भृत्याः सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्तः। रात्रौ केचन चौराः कम्बलान् चोरयितुं तस्य कुटीरं प्राविशन्। ते अपश्यन् यत् चाणक्यः एकस्मिन् कटे कम्बलं विना एव सुप्तः। तस्मिन् एव क्षणे चाणक्यः पदध्वनिं श्रुत्वा प्रबुद्धः। चौराः तम् अपृच्छन् - ' भवतां समीपे कम्बलानां राशिः अस्ति तथापि भवान् कम्बलं विना एव स्वपिति '। चाणक्यः अवदत् - ' श्रृणुत! एते **प्रावारकाः** केवलं निर्धनेभ्यः वितरणार्थम् एव सन्ति। यदि अहम् एतेषु एकं स्वीकरोमि तर्हि अहम् अपि चौरः भविष्यामि। "नतमस्तकाः चौराः " तस्य पादयोः पतित्वा क्षमायाचनाम् अकुर्वन्।"

**I. एकपदेन उत्तरत- 2**
i) चाणक्यः किं श्रुत्वा प्रबुद्धः?
ii) कम्बलानां वितरणं केभ्यः एव आसीत्?
iii) चाणक्यः कम्बलं विना कुत्र शेते स्म?
iv) एकदा कस्य भीषणः प्रकोपः अभवत्?

**II. पूर्णवाक्येन उत्तरत- 2**
i) भृत्याः कम्बलान् कस्य कुटीरे स्थापितवन्तः?
ii) चौराः चाणक्यस्य पादयोः पतित्वा किम् अकुर्वन्?

**III. निर्देशानुसारं उत्तरत- 1**
i) **"कम्बलस्य"** अन्यत् पर्यायपदम् अत्र किम् प्रयुक्तम्?
ii) **"केचन"** इति पदं केषां विशेषणम्?